# संस्कृतवार्ता:

दिनाङ्क :   25/09/2025                                    सायम्  - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना राजस्थानस्य बांसवाडेति क्षेत्रे एकदशमलवद्वि-द्वि-लक्ष-कोटिरूप्यकाणां विकास-परियोजनानां उद्घाटनम्, शिलान्यासश्च कृतः।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना ग्रेटर्-नोयडा इत्यत्र उत्तरप्रदेश-अन्ताराष्ट्रिय-व्यापार-प्रदर्शिन्याः उद्घाटनावसरे वैश्विकविघ्नावस्थानाम् अनिश्चिततानां सत्स्वपि भारतस्य विकासः उल्लेखनीयः अस्तीति उक्तम्।
- भारतं रेलाधारित-मोबायल-लांचर-सिस्टम् इति मध्यमपरिधेः-अग्नि-प्रैम्-मिसैल् इति प्रक्षेपास्त्रस्य सफलतया परीक्षणम् अकरोत्।
- बी. सी. सी. आई. इत्यनेन एशिया-कप्-क्रीडाकाले अनुचितकार्याचरणविषये पाकिस्तानस्य क्रिकेट्-क्रीडकौ हरीस् राउफ्, साहिबज़ादा फरहान् इत्यमू विरुध्य आई. सी. सी. इत्यत्र परिवाद: दत्त:।

<u>---------------------------------------------</u>

<u>प्रधानमन्त्री राजस्थान</u>

प्रधानमन्त्री नरेन्द्र मोदी अद्य राजस्थाने एक दशांशोत्तरद्वाविंशति लक्षकोटिभ्यः अधिकमूल्यानां अनेकविकासपरियोजनानां आधारशिला-स्थापनं उद्घाटनं च अकरोत्। प्रधानमन्त्री अद्य राजस्थाने एक दशांशोत्तरद्वाविंशति लक्षकोटिभ्यः अधिकमूल्यानां अनेकविकास-परियोजनानां आधारशिलास्थापनं उद्घाटनं च अकरोत्। सः बांसवाडायां विकास-परियोजनानां शिलान्यासं उद्घाटनं च विहितवान्। माही बांसवाड़ा क्षेत्रे राजस्थानपरमाणुविद्युत्परियोजनायाः अन्तर्गतं उन्नतसुरक्षाविशेषताभिः सप्तशतं मेगावाट् क्षमताभिः सह चत्वारि स्वदेशीयाः भारयुता: जलनाभकीय अभिकारका: अर्थात् जल रिएक्टर् इति स्थापिताः , येन राज्ये विद्युत: उत्पादनं वर्धितम्।

देशे मोदीमहोदयः अद्य अनेकासाम हरित ऊर्जा परियोजनानां उद्घाटनं अपि कृतवान्।

---------------------------------------------

<u>पी एम्-यू पी ट्रेड् स्नोः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् वैश्विकविघ्नानां अनिश्चिततायाश्च सत्स्वपि भारतस्य विकासः उल्लेखनीयः एव अस्ति। अद्य प्रातः ग्रेटर्-नोयेडेति उपनगरे उत्तरप्रदेश-अन्ताराष्ट्रिय-व्यापार-प्रदर्शिन्याः उद्घाटनं कुर्वन्, श्रीमोदी अवदत् यत्, व्यवधानेन देशस्य ध्यानं न विचलितं भवति। अतः देशः तस्याम् एव परिस्थितौ नूतनाः दिशः, नूतनान् अवसरांश्च अन्विष्यति। एतेषां व्यवधानानां मध्ये, अद्य भारतं आग्रिमदशकेभ्यः आधारं सुदृढं कुर्वदस्ति, देशस्य संकल्पश्चास्ति आत्मनिर्भरभारतस्य मन्त्रः इति सः अवदत्।

प्रधानमन्त्री अवदत् यत्, सर्वकारः मेक्-इन्-इण्डिया इत्यत्र केन्द्रितः अस्ति, देशे चिप्-इत्यतः-शिप् इति पर्यन्तस्य निर्माणलक्ष्यम् अस्ति। श्रीमोदी उक्तवान् यत् भारतेन यू. पी.आई., आधारः, डिजिलॉकर्, ओ. एन्. डी. सी. इत्यादयः मुक्तमञ्चाः निर्मिताः सन्ति, ये सर्वेभ्यः योजयन्ति, सर्वेभ्यः अवसरान्श्च यच्छन्ति।

श्रीमोदी अवदत् यत्, अद्य सर्वकारस्य ई-मार्केट्-प्लेस् जेम इति फलकेन प्रायः पञ्चविंशतिः लक्षप्रायः विक्रेतारः सेवा-प्रदातारश्च सर्वकाराय आपूर्तिं यच्छन्ति। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः प्रधानमन्त्रिणः स्वागतमकरोत् , उक्तवाञ्च यत् ऐतिहासिकतया वस्तु सेवा कर-जी. एस्. टी. परिष्काराणां कार्यान्वयनानन्तरं प्रधानमन्त्रिणः उत्तरप्रदेशस्य एषा प्रथमा यात्रा अस्ति। सः अवदत् यत्, निर्धनाः, कृषकाः, महिलाः, युवकाः, मध्यमवर्गीयाः, वणिजः, लघु-मध्यमोद्यमाः, सर्वे समुदायाः, जातीयाश्च जनाः अस्मिन् दीपावल्यवसरे उपहारं प्राप्तवन्तः।

---------------------------------------------

<u>भारतप्रक्षेपास्त्रम्</u>

भारतेन रैलाधारित-जंगम-प्रक्षेपण-व्यवस्थायुतं ए. जि. एस्. प्रैम्-मिसैल् इत्यस्य सफलप्रक्षेपणं कृतम्। प्रक्षेपणमिदं द्विसहस्र किलोमीटर इति यावत् परिधिम् आच्छादयितुं शक्नोति। विविधाभिश्च उन्नतविशेषताभिः युक्तमस्ति।

---------------------------------------------

## हरदीप सिंह: हैड्रोजन सम्मेलनम्

पेट्रोलियम-प्राकृतिक-वात-मन्त्री हरदीपसिंह-पुरी अद्य अवदत् यत्, भारतेन विंशति प्रतिशतं जैव-इन्धन-सम्मिश्रणस्य लक्ष्यं षण्मासेभ्यः पूर्वमेव प्राप्तमिति। नवदिल्ल्यां विश्व-हैड्रोजन्-भारत-शिखरसम्मेलनं सम्बोधयन् सः उल्लिखतवान् यत् त्रिंशदुत्तरद्विसहस्रतमवर्षपर्यन्तं पञ्चाशल्लक्षटन- परिमितस्य हरित-हैड्रोजन् इत्यस्य उत्पादनक्षमतां प्राप्तुं भारतस्य एकमेव रक्षणात्मकं लक्ष्यम् अस्तीति। श्रीसिङ्ह: इतोऽपि अवदत् यत् हरित-हैड्रोजन् इति भविष्यस्य इन्धनम् अस्ति, यत्र स्थानीय-आग्रहः, स्थानीय-उत्पादनं, स्थानीय-उपभोगः च भवति तत्र सः सफलः भविष्यति इति।

श्रीसिङ्हः उल्लिखतवान् यत् भारतस्य तैल-वायु-सार्वजनिक-उपक्रमाः त्रिंशदुत्तरद्विसहस्रतमवर्षपर्यन्तं दशलक्षटनपरिमितस्य हरित-हैड्रोजन् इत्यस्य स्थापनायाः योजनां घोषयन्ति, येन देशः ऊर्जा-संक्रमणस्य नेतृत्वं कर्तुं सज्जः भवेदिति।

---------------------------------------------

## रक्षा एलसीएः

रक्षामन्त्रालयेन हिन्दुस्तान् एरोनॉटिक्स् लिमिटेड् इत्यनेन सह भारतीयवायुसेनायाः कृते सप्तनवतिः लघु-युद्धविमानानां एम्. के. 1. ए. इत्यस्य क्रयणार्थं द्विषष्टि-सहस्रकोटिरूप्यकाणां क्रयणार्थं अनुबन्धः हस्ताक्षरितः। यस्मिन् अष्टषष्टिः युद्धविमानानि, नवविंशतिः युग्मसीटर्-विमानानि च सन्ति, अपि च भारतीय-वायुदलेन सम्बद्धानि उपकरणानि अपि सन्ति।

---------------------------------------------

## भाजपा-बिहार सर्वकारः

भाजपेति दलेन अद्य केन्द्रीयमन्त्री धर्मेन्द्र-प्रधानः आग्रिमाय बिहारविधानसभानिर्वाचनाय दलस्य निर्वाचन-प्रभारीरूपेण नियुक्तः। दलम् केन्द्रीयमन्त्री सी. आर्.पाटिल इत्यमुमपि नियुक्तवत्। उत्तरप्रदेशस्य उपमुख्यमन्त्री केशवप्रसादमौर्यः च निर्वाचनस्य सह-प्रभारीरूपेण नियोजितः।

---------------------------------------------

स्वाच्छता अभियानम्

रक्षामंत्री राजनाथसिंहः अद्य नवदेहल्याः सेना-मुख्यालये स्वच्छता एव सेवा इत्यभियानस्य भागत्वेन स्वच्छता-कर्मचारिणां सम्मानं कृतवान्। अस्मिन् अवसरे, श्रीसिङ्हः अवदत् यत्, 'स्वच्छभारत अभियानम्' इतीदं देशस्य प्रत्येकजनं यावत् क्रान्तिरूपेण प्राप्तमस्ति तत् अद्भुतम् अस्ति। तस्य क्रान्तेः भागत्वेन अद्य राष्ट्रम् स्वच्छता-दिवसम् आचरति इति सः अवदत्। केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री तथा भाजपा-अध्यक्षः जे. पी. नड्डाः नवदेहल्याम् अस्यवर्षस्य "स्वच्छता ही सेवा" इति अभियाने सम्मिलितोऽभवत्।

---------------------------------------------

क्रिकेट्

भारते क्रिकेट् नियन्त्रणमण्डलेन (बीसीसीआई) पाकिस्तानस्य क्रिकेट्-क्रीडकयोः साहिबजादा फरहान-हरिस-रौफ-योः विरोधे आधिकारिकतया परिवेदना पञ्जिकृता। या अशिष्टता विरोधे एशिया-कप सुपर-४-क्रीडायाः समये विहितम्। भारतीय दलेन अस्मै दुर्व्यवहाराय कठोर क्रियान्वयनाय। याचितम्

।। इति वार्ता: ।।